## अथ वार्ताः

### प्रधानमन्त्री-धन्यवादप्रस्तावः

प्रधानमन्त्री नरेन्द्रमोदी सबलतया प्रोक्तवान् यत् तस्य प्रशासनस्य विकासस्य प्रतिरूपम् 'राष्ट्रं प्रथमम् ' इति अस्ति। यत् तुष्टीकरणरहितं भूत्वा संतुष्टौ केन्द्रितम् वर्तते। असौ प्रोक्तवान् यत् जना: एतस्य प्रतिरूपस्य परीक्षणं बोधं समर्थनं च कृतवन्त:, अत एव तृतीयवारम् अपि प्रशासनाय जनादेशः तैः प्रदत्त:।

प्रधानमन्त्रिणा ह्य: संसदः द्वयोः सदनयोः संयुक्तोपवेशने राष्ट्रपते: द्रौपदीमुर्मु-वर्यायाः अभिभाषणे धन्यवाद-प्रस्तावम् अधिकृत्य राज्यसभायाम् उत्तरं प्रयच्छता इदं वक्तव्यं प्रदत्तम्। कांग्रेस्-दलं विरुध्य कथयन् प्रधानमन्त्री प्रोक्तवान् यत् 'सबका साथ, सबका विकास " इति प्रतिरूपम् कांग्रेस्-दलाय दुष्करम् अस्ति यतो हि सम्पूर्णं कान्ग्रेस-दलम् एकस्मै एव परिवाराय समर्पितम् अस्ति। सः अग्रे प्रोक्तवान् यत् तस्य प्रशासनं विकासस्य पोषणार्थं कौशलविकासस्य, वित्तीय-समावेशनस्य, औद्योगिकीकरणस्य च कृते प्राधान्यम् अददात्।

### जयशङ्करः-राज्यसभा

विदेशमन्त्री डॉ. एस्. जयशङ्कर: कथितवान् यत् अवैध-प्रवासिनां निर्वासनप्रकिया अन्ताराष्ट्रिय-सम्बन्धेषु सामान्यतया एकः स्वीकृतः सिद्धान्तः अस्ति। असौ दृढरूपेण अवदत् यत् विधिगतगतिशीलताया: संवर्धनम् राष्ट्राणां पारस्परिककल्याणे निहितम् वर्तते। डॉ. एस्. जयशङ्करः अमेरिकायाः भारतीय-नागरिकाणां निर्वासनप्रकरणम् अधिकृत्य राज्यसभायाम् एकं वक्तव्यं प्रयच्छन् प्रोक्तवान् यत् अवैधरूपेण निवासतां स्वकीयानां नागरिकाणां प्रत्यावर्तनं प्रत्येकं राष्ट्राय अनिवार्यम् अस्ति। लोकसभायां विपक्षसदस्यानां संजातकोलाहलस्य मध्ये डॉ. जयशङ्करः एतादृशं वक्तव्यं दत्तवान्। तस्य वक्तव्यस्य अनन्तरं यदा कोलाहलः अन्ववर्तत तदा अध्यक्षः आदिवसपर्यन्तं सभां स्थगितवान्।

### राजनाथसिंह:

रक्षामन्त्री राजनाथसिंह: अमेरिकादेशस्य च रक्षा सचिव: पीट्-हेगसेथ् इत्येष: ह्य: भारतामेरिकारक्षासहयोगकार्याणां समीक्षां कृतवन्तौ। दूरभाष-वार्तालापावधौ श्रीसिंह: श्रीहेगसेथ् इत्येतस्मै अमेरिकाया: रक्षासचिवत्वेन तस्य नियुक्तये वर्धापनानि अयच्छत्। उभौ नेतारौ द्विपक्षीय-रक्षा-सहभागित्वस्य प्रशंसां अपि च सम्बन्धान् अपि प्रबली-कृतवन्तौ।

### दिल्लीविधानसभा-मतगणना

शनिवासरे भविष्यमाणायै दिल्लीविधानसभाया: मतगणनायै सर्वा: सज्जता: अन्तिमे चरणे विद्यन्ते। नवनवत्यधिक-षड्शतं प्रत्याशिनां कृते आहत्य षष्टि दशमलव चत्वारि द्वे प्रतिशतं यावत् मतदानं समनुष्ठितम्। निर्वाचनायोगेन सूचितं यत् ई.वी.एम्. इति यन्त्राणि सुदृढ-कक्षेषु संस्थापितानि। तदर्थम् आयोग: आरक्षि-अधिकारिण: सततं निरीक्षमाणा: वर्तन्ते। निर्वाचनायोगेन अग्रे प्रख्यापितं यत् मतगणनायै दिल्ल्या: सर्वेषु एकादश जनपदेषु नवदशमतगणना - केन्द्राणि विनिर्मितानि।

### क्रिकेट्-प्रतिस्पर्धा

पुरुषाणां क्रिकेट्-क्रीडायां, भारतीयदलेन नागपुरे तिसृणां प्रतिस्पर्धानां श्रृङ्खलाया: प्रथमे एकदिवसीयद्वन्द्वे इंग्लैण्डदलं चतुर्भि: स्तोभै: पराजितम्। एतेन साकमेव भारतीयदलम् एकं शून्यम् इत्यङ्कान्तरालेन अग्रत्वं भजते। द्वितीया क्रीडा श्रृङ्खलाया: रविवासरे कटकनगरे क्रीडिष्यते।

।। इति वार्ता:।।